# SaptaratrotsavaprakaraH

# સપ્તરાત્રોત્સવપ્રકારઃ

## Document Information

Text title : Saptaratrotsavaprakarah

File name : saptarAtrotsavaprakAraH.itx

Category : vishhnu, vAdirAja, vishnu

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Revathy Rajaraman, Uma Mahesh

Latest update : April 27, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 30, 2024

*sanskritdocuments.org*

# સપ્તરાત્રોત્સવપ્રકારઃ

દેવોપદેવાઃ પિતરો યોગીન્દ્રાશ્ચક્રવર્તિનઃ ।
શ્રીવિષ્ણુપાર્ષદાઃ સર્વેઽપ્યાયાન્તૂત્સવરક્ષકાઃ ॥ ૧॥

ધ્વન્ત્વન્તરાયાન્પરિતઃ કૃન્તન્તુ પરિપન્થિનઃ ।
સન્તારયન્તુ કર્માબ્ધિં સન્તુ સન્તોષદાઃ સદા ॥ ૨॥

હીનતાં પૂરયન્ત્વેતે હાનિર્માસ્ત્વત્ર કાચન ।
જ્ઞાનાનન્દમયઃ શ્રીમાન્ શ્રીનાથઃ પ્રીયતાં પ્રભુઃ ॥ ૩॥

સપ્તરાત્રોત્સવાસ્સર્વે સાર્થકાસ્સન્તુ સન્તતં ।
તૃપ્તોઽસ્તુ લક્ષ્મીરમણોઽસ્માકં યુષ્મદનુગ્રહાત્ ॥ ૪॥

ઇન્દ્રો મહૈશ્વર્યદઃ સ્યાદસ્મિન્નુત્સવકર્મણિ ।
હુતં તુ સુહુતં કુર્યાત્સપ્તજિહ્વો હુતાશનઃ ॥ ૫॥

યમો નિયમયેચ્છત્રૂન્નિરૃતિર્હન્તુ રાક્ષસાન્ ।
વરુણો વારયેદ્વિઘ્નાન્વાયુર્જ્ઞાનપ્રદોઽસ્તુ નઃ ॥ ૬॥

ધનદસ્તુ ધનં ભૂરિ દદ્યાદુત્સવપૂર્તયે ।
ચન્દ્રઃ શાન્તકરો ભૂયાદાહ્લાદયતુ ચ પ્રજાઃ ॥ ૭॥

વિદ્રાવયેદભદ્રાણિ રુદ્રો રૌદ્રપરાક્રમઃ ।
અનન્તોઽનન્તફલદમિમં કુર્યાન્મહોત્સવમ્ ॥ ૮॥

બ્રહ્મા સર્વાણિ કર્માણિ સમ્યગ્ચીહ કરોતુ નઃ ।
હરે ભવત્પ્રસાદેન મોક્ષાખ્યફલસિદ્ધયે ॥ ૯॥

અઙ્કુરારોપણં પૂર્વં કિઙ્કુરૈઃ ક્રિયતે તવ ।
પાર્ષદાઃ પાન્ત્વહોરાત્રમસ્મિન્નુત્સવકર્મણિ ॥ ૧૦॥

વિષ્ણોસ્સર્વાણિ ભૂતાનિ રક્ષન્તુ પરિતો દિશં ।
વિષ્વક્સેનશ્ચ વિઘ્નેશો વિષ્વક્સ્વસ્વગણૈર્યુતૌ ॥ ૧૧॥

નિકૃન્તતાં ચાન્તરાયં શાન્તિં ચ કુરુતાં સદા ।
પઞ્ચોત્સવાઃ પઞ્ચદિનેષ્વથો વિષ્ણુરથોત્સવઃ ॥ ૧૨॥

પશ્ચાદવભૃથસ્નાનં દ્રષ્ટૄણાં સન્તુ તુષ્ટયે ।
પ્રાગ્રત્નમણ્ટપે કુર્યાદુત્સવં શ્રીપતેઃ સુધીઃ ॥ ૧૩॥

પશ્ચાત્સિંહોત્સવં કુર્યાદ્ગજોત્સવમતઃ પરં ।
શેષોત્સવં તતઃ કુર્યાત્તાર્ક્ષ્યોત્સવમતઃ પરમ્ ॥ ૧૪॥

રથોત્સવં તતઃ કુર્યાદલઙ્કૃત્ય જનાર્દનં ।
સર્વોત્સવસ્ય શ્રીભર્તુઃ સર્વોત્સવશિરોમણિઃ ॥ ૧૫॥

રથોત્સવોઽયં દદ્યાન્નો મનોરથમહોત્સવં ।
સપ્તરાત્રોત્સવાન્યસ્તુ ભક્ત્યા સેવેત માનવઃ ॥ ૧૬॥

સપ્તલોકોપરિસ્થોઽસ્ય વિષ્ણુર્હસ્તગતો ભવેત્ ।
નમોઽસ્તુ વિષ્ણવે તુભ્યં શ્રિયૈ ચાસ્તુ નમોનમઃ ॥ ૧૭॥

નમોઽસ્તુ પરિવારેભ્યો દેવેભ્યઃ શિવમસ્તુ નઃ ।
તૃપતસ્ત્રિવિક્રમસ્સર્વોત્તમસ્સપ્તભિરુત્સવૈઃ ॥ ૧૮॥

દદ્યાદાયુઃ શ્રિયં ભક્તિં મુક્તિં ચ ભજતાં સતાં ।
જનાસ્સુકૃતિનસ્સન્તુ મનોઽસ્તુ મધુસૂદને ॥ ૧૯॥

ભક્તિર્ભવેદ્ભવો નશ્યેન્નશ્યેયુરઘરાશયઃ ।
પૂર્વાપૂર્વક્રમજ્ઞાસ્યૈ સપ્તરાત્રમહર્નિશમ્ ॥ ૨૦॥

ઇમં સ્તવં યસ્તુ પઠેદ્વાદિરાજસમીરિતં ।
દિનેદિને તસ્ય ભવેદાયુઃ શ્રેયશ્ચ મઙ્ગલમ્ ॥ ૨૧॥

આહૂય દેવતાસ્સર્વા મન્ત્રેણાનેન માન્ત્રિકઃ ।
આરભેતોત્સવં વિષ્ણોર્ભેરીતાડનપૂર્વકમ્ ॥ ૨૨॥

વાચયિત્વા સ્વસ્ત્યયનં સ્તોત્રમેદદ્દિવૌકસાં ।
અઙ્કુરારોપણત્પૂર્વં પઠેયુર્હરિકિઙ્કરાઃ ॥ ૨૩॥

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતં
સપ્તરાત્રોત્સવપ્રકારઃ સમ્પૂર્ણઃ ।

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Proofread by Revathy Rajaraman, Uma Mahesh

*SaptaratrotsavaprakaraH*

pdf was typeset on April 30, 2024

Please send corrections to *sanskrit@cheerful.com*